# ১. ভারতবর্ষম্ ২. অস্মাকংদেশঃ

সর্বেষাং জীবানাং যথা বাসস্থানং বিদ্যতে তথৈব অস্মাকমপি বাসস্থানম্ অস্তি, যস্য নাম ভারতবর্ষম্। ভারতবর্ষম্ পুরাণপ্রসিদ্ধং স্থানম্। পুরাণেষু ভারতবর্ষম্, কিম্পুরুষবর্ষম্, হরিবর্ষম্, হিরন্ময়ঃ, উত্তরকুরুঃ, ইলাবৃতঃ, ভদ্রাশ্বঃ কেতুমালশ্চেতি নবদেশানাং নামানি উল্লিখিতানি, এতেষু প্রথমং নাম ভারবর্ষং। ভারতবর্ষং বিশালতয়া মহাদেশতুল্যম্। তেন ব্রহ্মাণ্ডপুরাণে অস্য নব বিভাগাঃ বর্ণিতাঃ। যথা — (১) ইন্দ্রদ্বীপঃ, (২) কেশরুঃ, (৩) তাম্রপর্ণঃ, (৪) গভস্তিমান্, (৫) নাগদ্বীপ, (৬) সৌম্যঃ, (৭) গন্ধর্বঃ, (৮) বরুণঃ, (৯) ভারতবর্ষঞ্চ। যদ্যপি বিভিন্নেষু পুরাণেষু অস্য পরিচয় বিষয়ে ভিন্নতা দৃশ্যতে তথাপি অধিকসংখ্যকেন স্বীকৃতম্ — ঋষভপুত্রস্য ভরতস্য নাম্না ভারতবর্ষমিতি খ্যাতিমগাৎ। অস্যস্থিতিঃ হিমালয়স্য দক্ষিণে এবঞ্চ লবণসমুদ্রস্যোত্তরে ভাগে বর্ণিতাস্তি। দ্বীপবিভাগেনাস্যস্থিতিঃ জম্বুদ্বীপান্তর্গতা বিরাজতে। অত্রস্থা ভূমিঃ সর্বগুণসম্পন্না, সর্বসম্পৎসমন্বিতেতি। মহাপুরাণানুসারেণ ভারতবর্ষস্য ক্ষেত্রফলং নবসহস্রযোজন পরিমিতমিতি।

অয়ং দেশঃ পুরা আর্যাবর্ত ইতি নাম্না সুপ্রসিদ্ধ আসীৎ। ইয়ং ভারতভূমিরের প্রকৃতেঃলীলাস্থলী, অত্রৈব প্রথমম্ আর্যসংস্কৃতেঃ বীজানি অঙ্কুরিতানি অভবৎ। যথাহ রাজর্ষিমনুঃ —

'এতদ্‌দেশ প্রসূতস্য সকাশাদগ্রজন্মনঃ।
স্বং স্বং চরিত্রং শিক্ষেরন্ পৃথিব্যাং সর্বমানবাঃ ॥

অতএব কালবিভাজনং বর্ণনীয়ম্। কালঃ অনন্তঃ, কিন্তু মানবস্যকৃতেঃ তস্য বিভাজনেন প্রয়োজনমস্ত্যেব। তেন অত্র বিদ্যন্তে সপ্তবারাঃ, পঞ্চদশতিথয়ঃ, দ্বৌপক্ষৌ, দ্বাদশমাসাঃ, ষট্‌ঋতবঃ উত্তরায়ণং দক্ষিণায়নঞ্চেতি। এবং কালবিভাজনম্ অন্যত্র ন দৃশ্যতে।

উত্তরস্যাং দিশি শুভ্রমুকুটায়মানঃ শৈলরাজো হিমালয়ো ভারতমাতুঃ হীরকমুকুট ইব রাজতে। দক্ষিণস্যাং দিশি ভক্ত ইব কৃতজ্ঞ ইব মহানুভবইব সমুদ্রঃ অস্যাশ্চরণৌ চিরাৎ প্রক্ষালয়ন্ নাদ্যাপি বিরতিং গতঃ। মধ্যস্থিতা বিন্ধ্যশৈলরাজিঃ মেখলা ইব আভাতি। বেদানাং পবিত্রা পরম্পরা, উপনিষদাং জ্ঞানবিজৃম্ভনম্ বাল্মীকি-ব্যাস-কালিদাসাদীনাং রসভাবসিক্তাঃ সরসাঃ সূক্তয়ঃ ইতএব সর্বপ্রথমং মুখরি ... প্রচারিতাশ্চ।

Scanned by CamScanner

ভারতবর্ষস্যৈব ভাগধেয়ানি যদত্র বিবিধভাষাভাষিণঃ অনেকধর্মাবলম্বিনঃ দেশান্তরেভ্য আগত্য অত্র কৃতবসতয়ঃ কুটুম্বিন ইব জনাঃ চ পরস্পরং রোষদ্বেষাদিকং বিহায় পরং সৌহার্দ্যেন বর্তয়ন্তি। অত্র নিবাসিষু একতারূপঃ প্রধানঃ গুণো দৃশ্যতে। তেনৈব ভারতবর্ষম্ অখণ্ডং রাষ্ট্রম্।

অত্রত্যাং পরম্পরাং প্রশংসমানঃ কশ্চন মনীষী এবমাত্মভাবং প্রকটয়তি —

"ধন্যোঽয়ং ভারতোদেশঃ ধন্যেয়ং সুরভারতী।
তৎপূজকা বয়ং ধন্যা অহো ধন্যা পরম্পরা ॥"

ভারতবর্ষে আধুনিক কালেঽপি বহবঃ প্রাতঃস্মরণীয়া মহাপুরুষাঃ জায়ন্তেস্ম জায়ন্তে চ বিশেষতঃ যত্রাগমনায় স্বয়ং দেবত্বং বিহায় দেবতাঃ মনুষ্যদেহমাশ্রিত্য আবির্ভবন্তি নূনং সা ভারতভূমিঃ ধন্যা, তত্র নিবাসিনশ্চ ধন্যাঃ।

## ৩. ভারতবর্ষস্য জাতীয় সংহতিঃ

একা ভারতীয়া প্রজ্ঞাভারতী — 'সংহতিঃ কার্য সাধিকা।' অতঃ ঐক্যমেব বলম্। বিশালস্য বৈচিত্র্যপূর্ণস্য দেশস্য ভারতবর্ষস্য সংহতিসাধনং যদ্যপি অচিন্তনীয়ম্ তথাপি তৎসাধিতম্। ভাষাসু, ধর্মেষু, অশনবসনেষু, আচার ব্যবহারেষু বহুষু বিষয়েষু ভারতীয়ানাং বৈষম্যে সত্যপি ভারতীয়াঃ সাংস্কৃতিক-বন্ধাঃ অদ্যাপি জাতীয়মৈক্যং সগর্বং পোষয়ন্তি।

'বিবিধের মাঝে দেখ মিলন মহান্' ইতি বঙ্গকবের্বচনস্য সার্থকতায়াঃ হেতুঃ ভারতীয়ানাং ভাষা, শিক্ষা, ধর্মচেতনা চ। আদৌ ভারতস্য অসমুদ্রহিমাচলস্য একা সংস্কৃতভাষা আসীৎ। অধুনা যদ্যপি অনেকা উপভাষা গঠিতাঃ তথাপি ভারতীয়ানাং সংস্কৃতেঃ ধারয়িত্রী সংস্কৃতভাষা সমমেব ক্রিয়াশীলা অস্তি। তস্য নিদর্শনম্ — অদ্যাপি ভারতবর্ষস্য দৈব-পৈত্র কোঽপি ধর্মানুষ্ঠানম্ বৈদিক-পৌরাণিক মন্ত্রং বিনা নানুষ্ঠীয়তে। জগদগুরুঃ শংকরাচার্যঃ সংস্কৃতভাষয়া নিবদ্ধং শাস্ত্রমবলম্ব্য ভারতবিজয়ং কৃত্বা ভারতস্য চতুঃপ্রান্তে চত্বারঃ মঠাঃ স্থাপিতবান্।

ভারতস্য শিক্ষায়াং ভেদবুদ্ধেরবকাশো নাস্তি। ভারতীয়াং শিক্ষাং লব্ধুং সর্বদা সর্বে জনাঃ ভারতস্য একপ্রান্তাৎ প্রান্তান্তরং গচ্ছন্তি, শিক্ষাং চ লব্ধা কৃতকৃত্যাঃ প্রতিষ্ঠাবন্তশ্চ ভবন্তি। শিক্ষায়াঃ এবম্ ঔদার্যং জাতীয়সংহতি সাধনস্য একতমং মূলম্। ভারতীয়শিক্ষায়াঃ মূলমন্ত্রং 'সংগচ্ছধ্বং সংবদধ্বং সংবো মনাংসি জানতাম্' ; 'সহবীর্যং করবাবহৈ তেজস্বিনাবধীতমস্তু' ইতি।

ভারতীয়ানাং ধর্মঃ সনাতনঃ। ধর্মচেতনায়াং ভারতীয়ানামৈক্যবোধঃ দর্শনীয়ঃ। হিমালয়াদারভ্যঃ কুমারিকা পর্যন্তং সর্বত্র গৃহ্যকর্মসু, একরূপতা দৃশ্যতে,

Scanned by CamScanner

এবমৈক্যবশাদেব বিষ্ণুপুরাণে ভারতস্য জাতীয়সংহতে র্মাহাত্ম্যগীতি র্লিখিতা ব্যাসেন —

"উত্তরং যৎ সমুদ্রস্য হিমাদ্রেশ্চৈব দক্ষিণম্।
বর্ষং তদ্ ভারতং নাম ভারতী যত্র বসতিঃ ॥

মুখ্যতঃ ধর্মসূত্রেণৈব ভারতং ঐক্যসূত্রেণাবদ্ধম্। রাজর্ষিঃ মনুঃ ধর্মশাস্ত্রপ্রণেতা, তেন ধর্মশাস্ত্রনির্ভরং যৎ রাজনীতিশাস্ত্রং প্রণীতং তদেব সমগ্রে ভারতে সর্বেষু রাজ্যেষু একদা প্রচলিতমাসীৎ। অদ্যাপি রাজ্য পরিচালনায়াং মনুনীতি র্গ্রহণীয়া, পরোক্ষভাবেন গৃহ্যতে এব। তেনৈব রাজনীতৌ অপি মহতী অখণ্ডতা দৃশ্যতে।

পুরা ভারতবর্ষে বহুনি খণ্ডরাজ্যানি সন্তি তেষাং রাজানঃ সর্বদা পরস্পরং যুদ্ধং কুর্বন্তঃ অপি সাংস্কৃতিকমৈক্যং ন বিস্মরন্তিস্ম। তেন ভারতস্য খণ্ডতা অক্ষুণ্ণা আসীৎ।

অতঃপরম্ শকহূন পাঠান মোগলাদয়ো বৈদেশিকাঃ পুনঃপুনঃ আক্রম্য ভারতস্য ঐশ্বর্যমপাহরন্ ; কিন্তু ভারতসংস্কৃতে র্বিনাশং সাধয়িতুং নাশক্নুবন্। ১৭৫৭ খ্রীষ্টবর্ষাৎ প্রায়েন দ্বিশতবর্ষানি যাবৎ অস্মাকং রাজনৈতিক স্বাধীনতা ইংরাজকরতলগতা আসীৎ অস্মাকন্তু সাংস্কৃতিক সংহতিঃ নাপগতা। তেন মিলিত প্রয়াসেন পুনঃ স্বাধীনতামুদ্ধর্তুং শক্তা বয়ম্। কিন্তু তদানীং কতিসংখ্যকানাং বললুব্ধানাং জনানাং ভারতচেতনায়া অভাববশাৎ ভারতবর্ষং দ্বিখণ্ডিতং জাতম্। অস্মাকং সংহতিরেব খণ্ডিতা আসীৎ। ভারতভূম্যাং সংহতিনাশস্য বীজমুপ্তম্। তদা সাম্প্রদায়িক-চিন্তয়া যা বিচ্ছন্নতা সৃষ্টা সা অধুনাপি ভিন্নভিন্নরূপেন সমায়াতি।

অধুনা ভারতস্য দিশি দিশি বিচ্ছিন্নতায়াঃ প্রকাশঃ দরীদৃশ্যতে। বিচ্ছিন্নতাভাবনয়া প্রতিদিনং বহবো জনা ম্রিয়ন্তে বহবঃ পরিবারাঃ বিলুপ্তা অপি ভবন্তি।

প্রাচীনভারতে যা সংহতিরাসীৎ অধুনা সা নাস্তি তস্য মুলম্ রাষ্ট্রনেতৃণাং সততায়াঃ অভাবঃ, দূরদর্শিতাহীনতা, ধর্মবোধরাহিত্যম্, শিক্ষায়াঃ স্বরূপ নির্ণয়ে অক্ষমতাঃ, সর্বোপরি ধনলিপ্সা ক্ষমতাস্পৃহা চ। স্বাধীনতায়া পরবর্তিনি কালে দেশনেতৃণাং ভারতীয়-সাংস্কৃতিং শিক্ষাং প্রতি অনাদরঃ বিচ্ছিন্নতাং জনয়তি। পুনরপি ধনবন্টনব্যবস্থায়াং সাম্যং নাপাদিতম্। তস্মাদধুনা ধনিনো ভবন্তি অধিকং ধনবন্তঃ, দরিদ্রাশ্চ অধিকতরদারিদ্র্যেণ ক্লিশ্যন্তি। দুর্বৃত্তা জাতাঃ সর্বকারস্য সেবকাঃ। দুর্নীতিপরায়ণা রাজনীতিবিদঃ। ভূমিহীনানাং কর্ষকানাং কৃতে ভূমিসংস্কার ব্যবস্থা অধুনাপি ন সম্পূর্ণা। শিল্পেষু ন কাপি গতিরুন্নতির্বা লক্ষ্যেতে। কর্মশালাসু স্থগিতানি কর্মাণি। ম্রিয়ন্তে শ্রমিকাঃ।

Scanned by CamScanner

জাতীয়তাবোধস্যাভাব এব জাতীয় সংহতিসম্পাদনস্য বাধাস্বরূপঃ। জাতীয়তাবোধং জাগরয়িতুং বিবিধা উপায়াঃ সন্তি। আদৌ শিক্ষায়াঃ স্বাস্থ্যস্য পরিষেবায়াঃ উন্নতিঃ কার্যা। শিক্ষাজগতি যে তাবজ্জনা অধুনা তিষ্ঠন্তি তে সদৈব ভারতীয় ভাষাং শিক্ষাং নাশয়িতুং তদুচিতং কর্মাণি কুর্বন্তি। ফলতঃ শিক্ষায়া অবনতিরেব ভবতি তেনৈব সহ জাতীয় সংহতের্বিনাশঃ ত্বরান্বিতো ভবতি।

ধর্মনিরপেক্ষে রাষ্ট্রে বিশেষধর্মং প্রতি পক্ষপাতিত্বং ন করণীয়ম্। রাষ্ট্রে সর্বে জনাঃ যদি সমম্ অধিকারং ন প্রাপ্নুবন্তি তর্হি বঞ্চিতানাং ক্ষোভাৎ রাষ্ট্রে বিভেদো জায়তে বিশৃঙ্খলাচ প্রাদুর্ভবতি। অধুনা ভারতস্য দুর্দিনম্। ভারতস্য দেশনেতৃণাং অবিমৃষ্যকারিতায়া জাতীয়-সংহতিঃ বিপন্না।

অতঃ পুনঃ ভারতস্য পুরাবৎ মধুর মিলনোদ্ধারার্থং সর্বেষাং দেশনেতৃণাং ততা দেশবাসীনাং চেষ্টা কর্তব্যা।

## ৪. সংস্কৃতশিক্ষায়া উপযোগিতা

অস্মিন্ জগতি বিবিধাঃ ভাষাঃ বিদ্যন্তে। তাসু সুসাহিত্যরচনায়াং বিবিধান্ বিষয়ানবলম্ব্য শাস্ত্রপ্রণয়নে যা স্বকীয়া দক্ষতা প্রদর্শয়িতুং শক্তা সা তু সংস্কৃত ভাষা। সংস্কৃতমিব স্বল্পসংখ্যকা ভাষা এব সর্ববিধ তথ্যপ্রকাশনে সমর্থাঃ ভবন্তি। যদ্যপি অস্মিন্ ক্ষেত্রে কস্যা অপি ভাষায়াঃ নামোল্লেখঃ ন ক্রিয়তে পরন্তু প্রাচীনতায়াং সর্বা ভাষা সংস্কৃতাৎ হীনাঃ। সংস্কৃতভাষা প্রায়শ্চতুসহস্রবর্ষাণি বেদ-স্মৃতি পুরাণেতিহাস-দর্শন-কাব্য-নাটক-ব্যাকরণ-জ্যোতির্বিজ্ঞানচিকিৎসাশাস্ত্রকলা - সঙ্গীতাদিবিষয়কৈগ্রন্থৈঃ স্বসামর্থ্যং প্রকটয়তি। পুনরপি ভারতীয়ভাষাণাং জন্মদাত্রীয়ং সংস্কৃত ভাষা। বঙ্গোৎকল-হিন্দী-গুর্জরাদয়োঽধুনাতনা ভাষাঃ সংস্কৃতভাষায়া এব সমুদ্ভুতা অধুনা স্বস্বসমৃদ্ধ্যা পল্লবিতা ভবন্তি। অতএবএতাসাং ভারতীয় ভাষাণামুত্তরোত্তর সমৃদ্ধয়ে মূলভূতা সংস্কৃতভাষা সর্বেষাং যত্নেনানুশীলনীয়া।

অপি চ ভারতস্য সংস্কৃতেরাধারো মুখ্যতো বেদোপনিষৎপুরাণ-রামায়ণ-মহাভারতাদয়ঃ। ভারতীয় সংস্কৃতের্যা দীপশিখা পৃথিব্যা অজ্ঞানান্ধকারং দূরীকৃত্য সর্বাঃ জাতীঃ আলোকিতান্ চকার তস্যা আলোক মাধুর্যং সংস্কৃতাধ্যয়নেন বিনা নোপলভ্যতে। পুরা ভারতবর্ষে ব্রাহ্মণ-ক্ষত্রিয়-বিশাং ভাষা সংস্কৃত ভাষা এব আসীৎ। তদানীম্ অধীতবিদ্যাঃ স্ত্রিয়ঃ সংস্কৃতজ্ঞাঃ ভবন্তিস্ম। অকুলীনাঃ পুরুষাঃ স্ত্রিয়শ্চ অসংস্কৃতজ্ঞাঃ মূর্খা আসন্, তেষামপি ভাষা সংস্কৃতাদেব গঠিতা অপভ্রংশ-বহুলা প্রাকৃতেতি; অদ্যাপি নাটকেষু দৃশ্যতে। অতএব সংস্কৃত ভাষাং বিহায় ভারতীবেদাদিশাস্ত্রধ্যাবিজ্ঞায় ভারতীয় সংস্কৃতেঃ বৈচিত্র্যং বিশিষ্ট্যমপি কেনাপি

জ্ঞাতুং ন শক্যতে। ভারতীয়ানাস্তু আত্মসংস্কৃতিরবশ্যমবগন্তব্যা। তেন সংস্কৃতভাষা অবশ্যপাঠ্যা।

পুনরপি অধুনা যা প্রযুক্তিবিদ্যা অর্থনৈতিকসাফল্যমানয়তি, যা চিকিৎসাবিদ্যা জীবনস্য স্থায়িত্বং সম্পাদয়তি, যৎ বিজ্ঞানশাস্ত্রং আধুনিকানি বস্তুজাতানি সম্পাদয়তি, — তাসু প্রযুক্তিবিদ্যা-চিকিৎসাবিদ্যা-বিজ্ঞানবিদ্যাসুচ সাফল্যলাভায় চরকসংহিতা-সুশ্রুতসংহিতাদিকম্, আর্যভট্টাদি প্রণীতানি জ্যোতির্বিজ্ঞানশাস্ত্রানি, বিজ্ঞানাশ্রিতানি শাস্ত্রান্যাপি পঠনীয়ানি। এতান্যবিদিত্বা কেবলং পাশ্চত্ত্যজ্ঞান-মাশ্রিত্য পরিশীলিতাঃ বিদ্যাঃ ন লভেয়ুঃ। এতানি সর্বাণি শাস্ত্রাণি যতঃ সংস্কৃত-ভাষয়া নিবদ্ধানি, তেন আদৌ সংস্কৃতভাষা শিক্ষণীয়া।

কেচিদধুনা আঙ্গলভাষয়া সর্বমধিগমনং সম্ভবেদিতি বদন্তি। তত্র একঃ সংশয়ো, যদ্যপি আঙ্গলভাষাপি বলিষ্ঠা তথাপি বিজাতীয়ত্বাৎ বর্ষশর্তত্রয়েনাপি স্বল্পসংখ্যকা ভারতীয়া তস্যাং নিষ্ণাতা দৃশ্যন্তে। অতঃ আত্মসম্পদ্ বিহায় পরধনাকৃষ্টে সতি পরিণামো দুঃখাবহো ভবেৎ। তস্য নিদর্শনং সুলভমেব। আসমুদ্র হিমাচলং সংস্কৃতভাষা সর্বৈরেব জনৈ র্মান্যতে। ইয়ং ভাষা একদা ভারতবর্ষে লোকভাষারূপেণ প্রচলিতমাসীৎ। অস্যাঃ বলিষ্ঠত্বমপি সর্বৈঃ স্বীকৃতম্। অস্যাং ভাষায়াং যত্তু কাঠিন্যমনুমীয়তে তত্তু সুচিরকালম্ অনুশীলনভাবাদেব সঞ্জাতম্। অতঃ আদৌ অস্যাঃ ভাষায়াঃ যথাযথমভ্যাসঃ কর্তব্যঃ, তেন সদৈব সর্বৈঃ সংস্কৃতং পাঠ্যম্।

অত্র এতদপি উল্লেখ্যম্ সংস্কৃতভাষায়া সমৃদ্ধিঃ বলিষ্ঠত্বঞ্চ দৃষ্টা বহবো বৈদেশিকা আকৃষ্টা সন্তঃ যত্নেনাধীত্য প্রভূতং ফলং সমাসাদিতম্। অধুনা অস্মাকং তেষাং বৈদেশিকানাং গ্রন্থাঃ পাঠ্যাঃ। অতো যদি বয়ং ভারতীয়াঃ ভবেম তর্হি-অস্মাভিঃ সংস্কৃতভাষাশিক্ষায়া উপযোগিতা সর্বাগ্রগণ্যেতি সর্বথা অনস্বীকার্যা।

Scanned by CamScanner

অশোক কুমার বন্দোপাধ্যায় সম্পাদিত 'পাণিনীয় Helps to the study of sanskrit Grammar& Compositions' এই গ্রন্থ থেকে ছাত্র–ছাত্রীদের কিছু তথ্য দিতে পেরে আমি মাননীয় সম্পাদকের কাছে চির কৃতজ্ঞ।

Scanned by CamScanner